# संस्कृत-वार्ता:

दिनाङ्क :.18.12.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- मस्कट-नगरे भारत-ओमान्-देशयोः मध्ये ऐतिहासिक-व्यापक-आर्थिक-सहभागिता-सन्धिषु हस्ताक्षराणि जातानि; प्रधानमन्त्री नरेन्द्रमोदी ओमान-देशस्य सर्वोच्च-नागरिक-सम्मानेन ऑर्डर-ऑफ-ओमान इत्यनेन सम्मानितः।
- लोकसभायां विकसितभारत-जी. राम जी. विधेयकं विंशति पञ्चविंशति स्वीकृतम्; केन्द्रीय-मन्त्रिणा शिवराजसिंह चौहानेन उक्तं यत् नूतनेन विधेयकेन वृत्यावसरस्य प्रत्याभूतिः शत तः पञ्च विंशत्यधिकैकशत दिनानि यावत् वर्धितानि।
- अद्य नवदिल्ल्यां भारत-नीदरलैंड-देशौ स्वतन्त्रं, मुक्तं, नियम-आधारितं च हिन्द-प्रशांत-क्षेत्रं प्रति प्रतिबद्धतां पुनः दृढी-कृतवन्तौ।
- वायु-प्रदुषणं निवारणाय दिल्ली-नगरे पेट्रोल-पम्प्स इत्यत्र वैध- प्रदूषण-नियंत्रण-प्रमाणपत्रं विना वाहनानां कृते इन्धन प्रदानं न भविष्यति।
- अद्य दुबई-नगरे भारतीय-पुरुष-महिला-दले पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य रोल-बॉल-विश्वचषक-उपाधिं प्राप्तवन्तौ।

---------------------------------------------------------------------

प्रधानमन्त्री-मस्कट

प्रधानमन्त्री नरेन्द्रमोदी ओमान-देशस्य सर्वोच्च-नागरिक-सम्मानेन आर्डर-ऑफ-ओमान इत्यनेन सम्मानितः। मस्कट-नगरे भारत-ओमान-देशयोः मध्ये ऐतिहासिक-व्यापक-आर्थिक-सहभागिता-सन्धिपत्रेषु हस्ताक्षराणि जातानि। श्रीमोदी अवदत् यत्, भारते विविधता एव तस्य संस्कृतेः दृढः आधारः अस्ति, तथा च भारतीयानां कृते प्रतिदिनं नूतनवर्णम् आनयति, प्रत्येकः ऋतुः नूतनः उत्सवः भवति, प्रत्येकः परम्परा नवविचारेण आगच्छति। प्रधानमन्त्री स्वस्य ओमानदेशस्य यात्रायाः द्वितीये दिने मस्कट-नगरे मैत्रीपर्व इत्येतस्मिन् कार्यक्रमे भारतीयसमुदायं छात्रान् च सम्बोधयन् आसीत्। प्रधानमन्त्री अवदत् यत्, भारतीयाः यत्र तत्र गच्छन्ति, यत्र तत्र निवसन्ति,

ते विविधतायाः सम्मानं कुर्वन्ति। सः अवदत् यत्, भारतीय-प्रवासिनः सह्-अस्तित्वस्य सह्कारस्य च सजीवोदाह्रणानि सन्ति।

'मैत्रीपर्व्' इति कार्यक्रमः ओमान-देशे भारतीय-शिक्षा-व्यवस्थायाः पञ्चाशत् वर्षाणां समापन-उत्सवम् आचरति। सः अवदत् यत् मैत्रीपर्वः द्वयोः देशयोः मध्ये मित्रता, तेषां संयुक्तस्य इतिहासस्य, समृद्धस्य च भविष्यस्य उत्सवः अस्ति। अद्य प्रातःकाले, प्रधानमन्त्री मस्कट-नगरे भारत-ओमान-व्यापार-शिखरसम्मेलनं सम्बोधितवान्, यत्र उभयोः देशयोः व्यापार-प्रमुखाः उपस्थिताः आसन्। सः अवदत् यत्, शिखरसम्मेलनम् उभयोः देशयोः मध्ये द्वैपाक्षिकसम्बन्धेषु नूतनां दिशां गतिं च प्रदातुं शक्नोति। भारत-ओमान-व्यापार-शिखरसम्मेलनं सम्बोधयन् प्रधानमन्त्री उक्तवान् यत्, ऋतोः परिवर्तनं भवितुं शक्नोति, परञ्च भारत-ओमान-देशयोः मित्रता कालान्तरेण दृढतया वर्धिष्यति।

---------------------------------------------------------------------------

<u>लोकसभा- जी. राम. जी.</u>

अद्य लोकसभायां विकसितभारत-वृत्यावसर- प्रत्याभूतिः तथा आजीविका मिशन (ग्रामीण) विकसितभारत- जी. राम. जी. विंशति-पञ्चविंशति इति विधेयकं स्वीकृतम्। एतत् विधेयकं विंशतिवर्षाणां प्राचीनस्य महात्मागान्धी-राष्ट्रिय-ग्रामीण-रोजगार-प्रत्याभूति-पंचोत्तरद्विसहस्र अधिनियमस्य स्थाने भविष्यति। सप्तचत्वारिंशदधिक-द्विसहस्र- विकसितभारत इत्यस्य राष्ट्रियदृष्टिकोणेन सह संरेखितस्य ग्रामीणविकासस्य संरचनायाः स्थापनायै विधेयकं प्रयुज्यते। अस्य विधेयकस्य अन्तर्गतं प्रत्येकस्मिन् ग्रामीणपरिवाराय, यस्य वयस्काः सदस्याः कुशल-शारीरिक-कार्यं कर्तुं स्वेच्छया इच्छन्ति, तेभ्यः प्रत्येकस्मिन् वित्तीयवर्षे पञ्चविंशत्यधिकैकशत-दिवसानां वेतन- वृत्यावसरस्य वैधानिक-प्रत्याभूतिः प्रदीयते। विधेयकस्य विषये चर्चायाः प्रत्युत्तरे केन्द्रीयग्रामीणविकासमन्त्री शिवराज-सिंह-चौहानः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे मनरेगा-योजना समुचित-प्रभावीरूपेण च कार्यान्विता अस्ति। मनरेगा इत्यस्य अन्तर्गतं यू. पी. ए. सर्वकारेण केवलं त्रयोदश-सहस्राधिक द्विलक्ष-कोटिरूप्यकाणि व्ययः कृतः, तत्रैव नरेन्द्रमोदी-सर्वकारे त्रिपञ्चाशत्सहस्राधिक-अष्टलक्ष-कोटिरूप्यकाणि व्ययः अभवत्।

---------------------------------------------------------------------------

## नीदरलैंड

नीदरलैंड-देशस्य विदेश-मन्त्री डेविड-वैन-वील- इत्येषः अद्य नवदेहल्याः साउथ-ब्लाक इत्यत्र रक्षामन्त्रिणा राजनाथसिंहेन सह मिलितवान्। उभौ भारत-नीदरलैंड द्वैपाक्षिकसम्बन्धान् इतोऽपि सुदृढं विविधीकरणं च कर्तुं सन्धिपत्राणाम् आदानप्रदानं कृतवन्तौ। अद्य नवदिल्ल्यां भारत-नीदरलैंड-देशौ स्वतन्त्रं, मुक्तं, नियम-आधारितं च हिन्द-प्रशांत-क्षेत्रं प्रति प्रतिबद्धतां पुनः दृढी-कृतवन्तौ। राष्ट्रिय-राजधान्यां स्वस्य एकदिवसीय यात्रायाम्, सः पश्चात् विदेश-मन्त्रिणा डा. एस. जयशङ्करेन सह अपि मिलयिष्यति इति अपेक्षास्ति।

---------------------------------------------------------------------------

## रक्षामंत्री राजनाथसिंहः

रक्षामंत्री राजनाथसिंहः अद्य दृढतया उक्तवान् यत् ऑपरेशन-सिन्दूर- अभियानेन भारतस्य उत्कृष्ट-प्रभावं, अल्पकालिक-प्रचालन-क्षमतां प्रदर्शितम्। नवदिल्ल्यां वायुसेनायाः कमाण्डर्स्-सम्मेलनम् संबोधयन् मन्त्रिणा ऑपरेशन् सिन्दूर अभियानस्य समये प्रभावीरूपेण प्रयुक्तस्य भारतस्य वायु-रक्षा-व्यवस्थायाः उपकरणानां च प्रदर्शनस्य प्रशंसा कृता। श्रीसिंहः भविष्यस्य प्रत्येकस्यामं परिस्थित्यां अभियानेन शिक्षितुं उक्तवान्। सः भारतीय-वायुसेनायाः सौर्यस्य, वेगस्य, यथार्थतायाः च प्रशंसाम् अकरोत्।

---------------------------------------------------------------------------

## दिल्ली- वायु-प्रदूषणम्

दिल्ल्याः मन्त्री परवेश-साहिब-सिंहः अद्य पूर्वतनस्य आम आदमी-पार्टीति सर्वकारस्य तथा पूर्वमुख्यमन्त्रिणः अरविन्द केजरीवालस्य उपरि गत एकादशवर्षेषु राष्ट्रिय-राजधान्यां वर्धमानस्य वायु-प्रदूषणस्य स्तरस्य न्युनिकरणे किमपि न कृतम् इति आरोपितवान्। नवदिल्ल्यां वार्ताहरसम्मेलनं सम्बोधयन्, सः आम आदमी- दलं प्रदूषण-नियंत्रणाय किमपि कर्तुं असमर्थः अस्तीति आरोपितवान्। अद्यारभ्य, सम्पूर्णे दिल्ली-नगरे पेट्रोल्-पम्प्स् इत्यत्र, पी. यू. सी. इति

वैध-प्रदूषण-नियन्त्रण-प्रमाणपत्रं विना वाहनानां कृते इन्धनस्य वितरणम् न भविष्यति। पी. यू. सी. सी. इत्यस्य, नियमस्य अनुपालनस्य च निरीक्षणं कैमरा-आधारित-प्रणाल्या प्रचलति।

---

## बैडमिन्टन

बैडमिन्टन क्रीडायां सात्विक-साईराज-रंकी रेड्डी, चिराग-शेट्टी इत्येतयो: भारतीय-पुरूष-युगलम् अद्य सायं चीन-देशस्य हांगझोऊ-नगरे बी.डब्ल्यू.एफ. वर्ल्ड टूर फाइनल्स इत्यस्य उपान्त्यचक्रीय द्वन्द्वे स्थानं सुनिश्चेतुं इंडोनेशिया-देशस्य फजल-अल्फियान, मोहम्मद-शोहिबुल-फ्रिकी इत्येतयो: युगलं सम्मुखी करिष्यति।

---

## रोल बॉल

अद्य दुबई-नगरे भारतीय-पुरुष-महिला-दले पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य रोल-बॉल-विश्वचषक-उपाधिं विजितवन्तौ।

।। इति वार्ताः ।।